AIJRELPLS VOLUME 10, ISSUE 2 (2025, MAR/APR) (ISSN-2456-3897)ONLINE
Anveshana's International Journal Of Research In Education, Literature, Psychology And Library Sciences

# भासप्रणीतरूपकेषु सामाजिकतायाः प्रतिफलनम्

**अमरेन्द्र कुमार मिश्रः**
**सहाचार्य (साहित्य विभागः)**
**कालियाचक विक्रमकिशोर आदर्श संस्कृत महाविद्यालयः**
**पूर्वमेदिनीपुरं, पश्चिमबङ्गः**

कस्यापि कालस्य समाजस्य दर्शनं तत्कालीने साहित्ये प्रत्यक्षेण प्रकारान्तरेण वा निहितं भवतीति न तिरोहितं मतिमताम् भासस्य रूपकेष्वपि तत्कालीनस्य समाजस्य स्वरूपं द्रष्टुं शक्यते। महाकविः भासः "चतुर्णां वर्णानां कर्तव्यम्" आलिख्य वर्णव्यवस्थायाः पोषकः प्रतीयते। तदा ब्राह्मणः पूजनीय आसीत् तस्योल्लेखः मध्यमव्यायोगे द्रष्टुं शक्यते यथा –

**जानामि सर्वत्र सदा च नाम द्विजोत्तमाः**

**पूज्यतमाः पृथिव्याम् ।[१] इति**

ब्राह्मणाः सर्वदा क्षत्रियवैश्यशूद्राणां वन्दनीया आसन् संकेतोऽयं प्राप्यते यत् तस्मिन् काले अपराधकर्ता ब्राह्मणोऽपि अवध्योऽभवत् । यथा- सर्वापराधे वध्यत्वमनुमुच्यतां द्विजसत्तमः।[२] क्षत्रियाः प्राणोत्सर्गं कृत्वापि ब्राह्मणानां संरक्षणम् अकुर्वन्। यथा –

**क्षत्रियकुलोत्पन्नोऽहम् पूज्यतमाः खलु ब्राह्मणाः।**

**तस्माच्छरीरेण ब्राह्मणशरीरं विनिमातुमिच्छामि॥[३]**

विप्रे निर्धने सति मानवानां सम्पूर्णफलानि विनाशमुपयान्तीति मान्यताऽऽसीत्। यथा च प्राप्यत एव-

**किं तद् द्रव्यं किं फलं को विशेषः क्षत्राचार्यो यत्र विप्रो दरिद्रः॥[४]**

भासस्य धारणेयं कठोपनिषद्ग्रन्थस्य मन्त्रेणानेन प्रभावित दृश्यते –

**तिस्रो रात्रीर्यदवात्सीः गृहे मे अनश्नन् ब्रह्मन्नतिथिर्नमस्यः।**

**नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व॥[५]**

परं तदा ब्राह्मणः वेदवेदाङ्गानाम् ज्ञाताभवत्। यस्य संकेतः प्रतिमानाटके प्राप्यते। रावणः भणति – **भोः! काश्यपगोत्रोऽस्मि । सांगोपांगवेदमधीये, मानवीयं धर्मशास्त्रम्, माहेश्वरयोगशास्त्रं बार्हस्पत्यमर्थशास्त्रं, मेधाति थेर्न्यायशास्त्रं प्राचेतसं श्राद्धकल्पं च।[६]**

क्षत्रियोऽपि स्वधर्मे निरतः परम्परागताचारविचाराणां पोषकः देशस्य रक्षकः भवतिस्म। दुर्विनीतानां विनाशाय तु क्षत्रियः स्वकीयं सर्वस्वमपि तत्याज। प्रतिमानाटके सीताहरणप्रसंगे रावणः कथयति –

**बलादेव दशग्रीवः सीतामादाय गच्छति।**

**क्षात्रधर्मे यदि स्निग्धः कुर्याद् रामः पराक्रमम्॥[७]**

पञ्चरात्रे एकस्मिन् प्रसंगे प्रतिपादितं यत् क्षत्रियाणां समृद्धिः तेषां बाणाधीना भवति। स एव क्षत्रियः यः स्वशस्त्रबलेन विनाशयेत् दुष्टान्। उक्तमपि –

**बाणाधीना क्षत्रियाणां समृद्धिः।**[८]

वैश्यशब्दोल्लेखः चारुदत्तनाटकेऽस्ति । तत्र वैश्यस्य कृते श्रेष्ठी इति शब्दोऽयं प्रयुक्तो दृश्यते। शब्दोऽयं वैश्यस्य श्रेष्ठतायाः परिचायको वर्तते। वाणिज्यमेव वैश्यस्य प्रमुखव्यवसाय आसीत्। चारुदत्तनाटके संवाहकः आत्मपरिचयप्रसंगे कथयति – प्रकृत्या वणिगहम् । ततो भागधेयपरिवृत्ततया दशया संवाहकवृत्तिमुपजीवामि॥[९]

तत्र चारुदत्तः 'सार्थवाह' शब्देन व्यवह्रियते। भासस्य समये शूद्राणामपि समाजे विशिष्टं स्थानमासीत्। शूद्राः वैदिकमन्त्रैः विना देवान् प्रणमन्ति स्म। यथा - वार्षलस्तु प्रणामः स्यादमंत्रार्चित दैवतः।[१०] नहि शूद्राणां दयनीयावस्था तस्य नाटकेषु प्राप्यते[११]। भासस्य कतिपयेषु नाटकेषु मुख्यरूपेण ब्रह्मचर्यसंन्यासाश्रमयोः वर्णनमेव प्राप्यते। यथा- **ब्रह्मचारी कथयति- राजगृहीतोऽस्मि। श्रुतिविशेषणार्थं वत्स भूमौ लावाणकं नाम ग्रामस्तत्रोषित वानस्मि।**[१२]

संन्यासाश्रमे प्रथमं तपस्वी द्वितीयश्च परिव्राजकोऽगण्यत। यतयस्तु तपोवने निवसन्तिस्म। परिव्राजकाश्च इतस्ततः परिभ्रमन्तिस्म वानप्रस्थाश्रमस्याऽपि संकेताः प्रतिमानाटक अभिषेकनाटकयोः बहुषु स्थलेषु समुपलभ्यन्ते। एवं चतुर्णां वर्णानामाश्रमाणाञ्च तदानीं सुव्यवस्थाऽजायत। भासस्य नाटकेषु विवाहसंस्कारस्योल्लेखः सम्प्राप्यते। तदानीं पितरौ कन्याविवाहार्थं भृशमचिन्तयताम् -

**कन्याया वरसम्पत्तिः दृष्टा पितुः प्रयत्नतः।**

**भाग्येषु शेषमायत्तं दृष्टपूर्वं न चान्यथा॥**[१३]

'अविमारकेऽपि - "कन्यापितुर्हि सततं बहु चिन्तनीयम्" [१४]। संकेतत इदं प्राप्यते। भासस्य नाटकेषु धर्मशास्त्र- निर्दिष्टाना मन्येषामपि विवाहानां संकेताः प्राप्यन्ते। 'स्वप्नवासवदत्तम्' नाटके उदयन-पद्मावतीविवाह : ब्राह्मविवाहान्तर्गत आसीत् । 'अविमारकम्' इत्याख्ये नाटके अविमारक - कुरङ्गी-विवाहः, स्वप्नवासवदत्ते उदयन - वासवदत्ताविवाहश्च गांधर्वविवाहान्तर्गतौ आस्ताम्। स्वप्नवासवदत्ते उदयनः वासवदत्तामाहरत् । अतः विवाहोऽयम् राक्षसविवाहान्तर्गतः मन्तुं शक्यते। तदानीं संयुक्त परिवारस्य प्रचलनमासीत्। 'मध्यमव्यायोगम्' इति नाटके ब्राह्मणपरिवारस्य सर्वे सदस्याः परस्परं रक्षार्थं प्राणोत्सर्गं कर्तुं तत्पराः दृश्यन्ते तत्र वृद्धब्राह्मणस्य कथनमिदम् –

**कृतकृत्यं शरीरं मे परिणामेन जर्जरम् ।**

**राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम्॥**[१५]

संयुक्तपरिवारस्य वैशिष्ट्यं प्रत्यपादयत्। एतादृशे परिवारे गृहपतिरेव सर्वोपरि आसीत्। मध्यमव्यायोगे मध्यमः ब्राह्मणः घटोत्कचेन सह गन्तुमैच्छत् परिवाररक्षणाय स्वप्राणानां त्यागोऽयमात्मनः कर्तव्यं मनुते। कथयति चासौ –

**धन्योऽस्मि यद् गुरुप्राणाः स्वैः प्राणैः परिरक्षिताः।**

**बन्धुस्नेहाद्धि महतः कायस्नेहस्तु दुर्लभः॥**[१६] इति।

तदानीं कन्या-शिक्षाया अपि पूर्णतः प्रचलनमासीत् । यथा राजा - वासवदत्ता क्व?

**देवी-उत्तराया वैतानिकायाः सकाशे वीणां शिक्षितुं गतासीत्॥**[१७]

भासस्य नाटकेषु नारी पातिव्रत्यमङ्गीकुर्वाणा धर्मशास्त्रानुसारं गृहस्थे पूजिता चित्रितास्ति। अभिषेकनाटके सीता पवन पुत्रं वदति यत् – **भद्र! एतां मेऽवस्थां श्रुत्वार्यपुत्रो यथा शोक - परवशो न भवति, तथा मे वृत्तान्तं भण।**[१८]

पतिमेवात्मानः सर्वस्वं मानयन्ती नारी स्वकुलानुरूपमाचरतिस्म। 'स्वप्नवासवदत्ते' वासवदत्ता पत्युरभ्युदयायैव वने निवासं कर्तुमिच्छति। 'चारुदत्ते' ब्राह्मणी स्वपतिं निर्दोषं कारयितुं स्वकीयाममूल्यां मुक्तावलीमपि ददाति न केवलमेतावदेवापितु प्राणदानेनापि स्वपत्युः रक्षामात्मनः परमं कर्तव्यममन्यत अत एव मध्यमव्यायोगे ब्राह्मणी पत्युः रक्षायै प्राणोत्सर्गं कर्तुमपि तत्पराऽदृश्यत यथा - **पतिमात्रधर्मिणी पतिव्रतेति नाम।**[१९]

पत्नी आत्मानं पत्युः सुखदुःखसंगिनीममन्यत न पतिं विना सा एकाकिनी गृहे उषितुमैच्छत् रामेण वनगमनाय निषेधिताऽपि सीता तेनैव सह वनं गन्तुमिच्छति सौमित्रिरपि सीतायाः समर्थने कथयति –

**अनुचरति शशाङ्कं राहुदोषेऽपि तारा।**

**पतति च वनवृक्षे याति भूमिं लता च॥**

**त्यजति न करेणुः पंकलग्नं गजेन्द्रं।**

**व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः॥**[२०]

यथावगच्छन्त्येव जना नारी समाजे नैकरूपा, सा हि कुत्रचित् पत्नी अपरत्र भगिनी इतरत्र माता च भवति मातृरूपेणाऽपि भासेन आदर्श रूपं तस्याः प्रादर्शि –

**माता किल मनुष्याणां देवतानां च दैवतम्।**

**मातुराज्ञां पुरस्कृत्य वयमेतां दशां गताः॥**[२१]

ऊरुभंग-नाटके भीमसेनस्य गदया क्षताङ्गः दुर्योधनः स्वसमीपे मातरं गान्धारीं समालोक्य मातृभावनाभावितचेता भणति –

**नमस्कृत्य वदामि त्वां यदि पुण्यं मया कृतम्।**

**अन्यस्यामपि जात्यां मे त्वमेव जननी भव॥**[२२]

गृहस्थाश्रमे धर्मशास्त्राणामनुसारं वैदिकधर्मानुसारञ्च, अतिथिदेवो इत्यादिवाक्यैः अतिथिसत्कारस्य परमं महत्त्वमासीत्। स्वप्नवासवदत्तनाटके भासस्य नाटकेषु अतिथिसत्कारस्य महत्त्वं वर्णितं दृश्यते। तथाहि - प्रतिगृह्यतामतिथि सत्कारः॥पुनश्च अस्य नाटकस्य षष्ठांके राजा प्रतिहारीं वदति -

शीघ्रं प्रवेश्यतामभ्यन्तरं समुदाचारेण स ब्राह्मणः।

प्रतिमानाटकेऽपि रामः 'स्वागतमतिथये ' इति कथयन् रावणस्य स्वागतं करोति । अभिषेकनाटके रामः विभीषणस्यागमनं श्रुत्वा 'सत्कृत्य प्रवेशयतां विभीषणम्' इति वदति।

भासस्य नाटकेषु तत्कालीनाः कुरीतयोऽपि दृष्टिगताः भवन्ति। तथाहि द्यूतं हि समाजस्य विनाशकम् इति प्रचलनेऽपि समाजे द्यूतक्रीडका व्यलोक्यन्ते। चारुदत्तेन यदा द्यूते स्वद्रव्यं हारितं ततः न्यासोऽपि पराजितः, तदा विदूषकः कथयति –

**शृणोतु भगवती । तत्रभवतश्चारुदत्तस्य गुणप्रत्यायननिमित्तं खलु त्वयालंकारस्तस्मिन् निक्षिप्तः स तेन द्यूते हारितः।**[२३]

तस्मिन् काले वारांगनावृत्तिरपि आसीत् परं न केवलं देहव्यापार एव तासां कार्यमासीत् ता हि सख्यभावमपि पूणर्तः निर्वहन्तिस्म।[२४]

चौरवृत्तिमापन्ना अपि जना स्वकलायां प्रवीणा आसन्। अतः सज्जलकः सन्धिच्छेद-विषये प्रशंसोक्तिं वदति।

**सिंहाक्रान्तं पूर्णचन्द्रं झषास्यं**
**चन्द्रार्धं वा व्याघ्रवक्त्रं त्रिकोणम्।**
**सन्धिच्छेदः पीठिका वा गजास्य-**
**मस्मत्पक्ष्या विस्मितास्ते कथं स्युः॥**

दासप्रथायां सत्यां दासानां क्रयः विक्रयश्च सार्वजनिक आसीत् चारुदत्तनाटके मदनिकाया उदाहरणं द्रष्टुं शक्यते सा हि क्रीता दासी आसीत्।[२५]

एवं भासेन स्वनाटकेषु समाजस्य सर्वान् पक्षान् आश्रित्य यथार्थचित्रणं कृतम्। कामं तत् मर्यादितं वा स्यात् न तत्र तस्य पक्षपातः। तेन तु याथातथ्येन एव दृष्टानुरूपं तत् गृहीत्वा केवलं शब्दैः वर्णितमेवेति।

**पादटीकाः**

१. मध्यमव्यायोग १/९.
२. मध्यमव्यायोग १/३४.
३. मध्यमव्यायोग पृ. १/३४.
४. पंचरात्रम् १/३०.
५. पंचरात्रम् १/९.
६. प्रतिमानाटकम् पृ. १३४.
७. प्रतिमानाटकम् ५/२१.
८. पंचरात्रम् १/२४.
९. चारुदत्तम् पृ. ६०
१०. प्रतिमानाटकम् ३/६.
११. पंचरात्रम् १/६.
१२. वासवदत्तम् पृ. ४०
१३. प्रतिज्ञायौगन्धरायणम् २/५.
१४. अविमारकम् १/२.
१५. मध्यमव्यायोग १ / १५.
१६. तदेव, १/ २१.
१७. तदेव- पृ. ५२.
१८. अभिषेकनाटकम् पृ. ७२.
१९. प्रतिमानाटकम् १/१४.
२०. मध्यमव्यायोग १/१४.
२१. मध्यमव्यायोग १ / ३७.
२२. उरुभगम् १/५०.
२३. चारुदत्तम् पृ. ११८.
२४. चारुदत्तम् पृ. १ / १७.
२५. चारुदत्तम् पृ.३/९.

सन्दर्भग्रन्थसूची –

१. मुखोपाध्याय, डॉ अञ्जलिका, सम्पा. नाट्यशास्त्रम् (प्रथम-षष्ठाध्यायौ). प्र.सं. कलकाता : संस्कृत पुस्तक भाण्डार, २०१८.
२. वन्द्योपाध्याय, अशोककुमार, सम्पा. प्रतिमानाटकम्. प्र.सं. कलकाता : सदेश, २०१६.
३. वन्द्योपाध्याय, सत्यरञ्जन, सम्पा. भासेर नाटकावली. प्र.सं. कलाकात : संस्कृत पुस्तक भाण्डार, २०११.
४. द्विवेदी, त्रिलोकनाथ, सम्पा. मध्यमव्यायोग. प्र.सं. वाराणसी : भारतीय विद्या प्रकाशन, १९१७.
५. मिश्रः, श्रीरामचन्द्र, सम्प. अभिषेकनाटकम्, प्र.सं. वाराणसी : चौखम्बा विद्याभवन, १९९५.
६. गिरिः, कपिलदेव, व्याख्या. ऊरुभङ्गम्, प्र.सं. वाराणसी : चौखम्बा विद्याभवन, २००७.

७. द्विवेदी, रामायण, व्याख्या. चारुदत्तम्, प्र. सं. मोतीलाल बनारसी दास : दिल्ली, १९७७.